# ॥ कबन्धकृत-रामस्तोत्रम् ॥

## गन्धर्व उवाच

स्तोतुमुत् सहते मेऽद्य मनो रामातिसम्भ्रमात्।
त्वामनन्तमनाद्यन्तं मनोवाचामगोचरम्॥ ३० ॥

सूक्ष्मं ते रूपमव्यक्तं देहद्वयविलक्षणम्।
दृग्रूपमितरत् सर्वं दृश्यं जडमनात्मकम्।
तत्कथं त्वां विजानीयाद्व्यतिरिक्तं मनः प्रभो॥ ३१ ॥

बुद्ध्यात्माभासयोरैक्यं जीव इत्यभिधीयते।
बुद्ध्यादि साक्षी ब्रह्मैव तस्मिन्निर्विषयेऽखिलम्॥ ३२ ॥

आरोप्यतेऽज्ञानवशान्निर्विकारेऽखिलात्मनि ।
हिरण्यगर्भस्ते सूक्ष्मं देहं स्थूलं विराट् स्मृतम्॥ ३३ ॥

भावनाविषयो राम सूक्ष्मं ते ध्यातृमङ्गलम्।
भूतं भव्यं भविष्यच्च यत्रेदं दृश्यते जगत्॥ ३४॥

स्थूलेऽण्डकोशे देहे ते महदादिभिरावृते।
सप्तभिरुत्तरगुणैर्वैराजो धारणाश्रयः॥ ३५॥

त्वमेव सर्वकैवल्यं लोकास्तेऽवयवाः स्मृताः।
पातालं ते पादमूलं पार्ष्णिस्तव महातलम्॥ ३६ ॥

रसातलं ते गुल्फौ तु तलातलमितीर्यते।
जानुनी सुतलं राम ऊरू ते वितलं तथा॥ ३७॥

अतलं च मही राम जघनं नाभिगं नभः।
उरःस्थलं ते ज्योतींषि ग्रीवा ते मह उच्यते॥ ३८॥

वदनं जनलोकस्ते तपस्ते शङ्खदेशगम्।
सत्यलोको रघुश्रेष्ठ शीर्षण्यास्ते सदा प्रभो॥ ३९॥

इन्द्रादयो लोकपाला बाहवस्ते दिशः श्रुती।
अश्विनौ नासिके राम वक्त्रं तेऽग्निरुदाहृतः॥ ४०॥

चक्षुस्ते सविता राम मनश्चन्द्र उदाहृतः।
भ्रूभङ्ग एव कालस्ते बुद्धिस्ते वाक्पतिर्भवेत्॥ ४१॥

रुद्रोऽहङ्काररूपस्ते वाचश्छन्दांसि तेऽव्यय।
यमस्ते दंष्ट्रदेशस्थो नक्षत्राणि द्विजालयः॥ ४२॥

हासो मोहकरी माया सृष्टिस्तेऽपाङ्गमोक्षणम्।
धर्मः पुरस्तेऽधर्मश्च पृष्ठभाग उदीरितः॥ ४३॥

निमिषोन्मेषणे रात्रिर्दिवा चैव रघूत्तम।
समुद्राः सप्त ते कुक्षिर्नाड्यो नद्यस्तव प्रभो॥ ४४॥

रोमाणि वृक्षौषधयो रेतो वृष्टिस्तव प्रभो।
महिमा ज्ञानशक्तिस्ते एवं स्थूलं वपुस्तव॥ ४५॥

यदस्मिन् स्थूलरूपे ते मनः सन्धार्यते नरैः।
अनायासेन मुक्तिः स्यादतोऽन्यन्नहि किञ्चन॥ ४६॥

अतोऽहं राम रूपं ते स्थूलमेवानुभावये।
यस्मिन् ध्याते प्रेमरसः सरोमपुलको भवेत्॥ ४७॥

तदैव मुक्तिः स्याद्राम यदा ते स्थूलभावकः।
तदप्यास्तां तवैवाहमेतद्रूपं विचिन्तये॥ ४८॥

धनुर्बाणधरं श्यामं जटावल्कलभूषितम्।
अपीच्यवयसं सीतां विचिन्वन्तं सलक्ष्मणम्॥ ४९॥

इदमेव सदा मे स्यान्मानसे रघुनन्दन॥५०॥

सर्वज्ञः शङ्करः साक्षात्पार्वत्या सहितः सदा।
त्वद्रूपमेव सततं ध्यायन्नास्ते रघूत्तम।
मुमूर्षूणां तदा काश्यां तारकं ब्रह्मवाचकम्॥५१॥

रामरामेत्युपदिशन् सदा सन्तुष्टमानसः।
अतस्त्वं जानकीनाथ परमात्मा सुनिश्चितः॥५२॥

सर्वे ते मायया मूढास्त्वां न जानन्ति तत्त्वतः।
नमस्ते रामभद्राय वेधसे परमात्मने॥५३॥

अयोध्याधिपते तुभ्यं नमः सौमित्रिसेवित।
त्राहि त्राहि जगन्नाथ मां माया नावृणोतु ते॥५४॥

**श्री-राम उवाच**

तुष्टोऽहं देवगन्धर्व भक्त्या स्तुत्या च तेऽनघ।
याहि मे परमं स्थानं योगिगम्यं सनातनम्॥५५॥

जपन्ति ये नित्यमनन्यबुद्ध्या
भक्त्या त्वदुक्तं स्तवमागमोक्तम्।
तेऽज्ञानसम्भूतभवं विहाय
मां यान्ति नित्यानुभवानुमेयम्॥५६॥

॥इति श्रीमदध्यात्मरामयणे उमामहेश्वरसंवादे अरण्यकाण्डे नवमे सर्गे कबन्धकृतं श्री-रामस्तोत्रं सम्पूर्णम्॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Kabandhakrta_Rama_Stotram.

generated on **May 9, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits